शतश्लोकी रामायणं

श्री महागणपतये नमः श्री सरस्वत्यै नमः
श्री पाद वल्लभ नरसिंह सरस्वति श्री गुरु दत्तात्रेयाय नमः
श्री श्री श्री गणपति सच्चिदानंद सद्गुरुभ्यो नमः

1. शुक्लांबरधरं विष्णुं शशि वर्णं चतुर्भुजं
प्रसन्न वदनं ध्यायेत् सर्व विघ्नोपशांतये

2. शारदाशारदांभोज वदना वदनांबुजे
सर्वदा सर्वदास्माकं सन्निधिस्सन्निधिं क्रियात्

3. अखंड मंडलाकारं व्याप्तं येन चराचरं
तत्पदं दर्शितं येन तस्मै श्री गुरवे नमः

4. कूजंतं रामरामेति मधुरं मधुराक्षरं
आरुह्य कविता शाखां वंदे वाल्मीकि कोकिलं

5. अंजना नंदनं वीरं जानकी शोक नाशनं
कपीशमक्ष हंतारं वंदे लंका भयंकरं

6. वेदवेद्ये परे पुंसि जाते दशरथात्मजे
वेदः प्राचेतसादासीत् साक्षाद्रामायणात्मना

ध्यानं

7. रामाय रामभद्राय रामचंद्राय वेधसे
रघुनाथाय नाथाय सीतायाः पतये नमः

शतश्लोकी रामायणं

बाल कांड

1. तपस्स्वाध्याय निरतं तपस्स्वी वाग्विदां वरं
नारदं परिपप्रच्छ वाल्मीकिर्मुनिपुंगवं

2. कोन्वस्मिन् सांप्रतं लोके गुणवान् कश्च वीर्यवान्
धर्मज्ञश्च कृतज्ञश्च सत्यवाक्यो दृढव्रतः?

3. चारित्रेण च को युक्तः? सर्व भूतेषु को हितः?
विद्वान् कः? कः समर्थश्च? कश्चैक प्रिय दर्शनः?

4. आत्मवान् को? जितक्रोधो द्युतिमान् कोनसूयकः?
कस्य बिभ्यति देवाश्च जात रोषस्य संयुगे?

5. एतदिच्छाम्यहं श्रोतुं परं कौतूहलंहि मे
महर्षे! त्वं समर्थोसि ज्ञातुमेवं विधं नरं

6. श्रुत्वाचैतत्त्रिलोकज्ञो वाल्मीकेर्नारदो वचः
श्रूयतामिति चामंत्र्य प्रहृष्टो वाक्यमब्रवीत्

7. बहवो दुर्लभाश्चैव ये त्वया कीर्तिता गुणाः
मुने! वक्ष्याम्यहं बुद्ध्वा तैर्युक्तश्श्रूयतां नरः

8. इक्ष्वाकुवंश प्रभवो रामो नाम जनैश्श्रुतः
नियतात्मा महावीर्यो द्युतिमान् धृतिमान् वशी

9. बुद्धिमान् नीतिमान् वाग्मी श्रीमान् शत्रु निबर्हणः
विपुलांसो महाबाहुः कंबुग्रीवो महाहनुः

10. महोरस्को महेष्वासो गूढजत्रुररिंदमः
आजानुबाहुस्सुशिराः सुललाटस्सुविक्रमः

11. समस्समविभक्तांगः स्निग्धवर्णः प्रतापवान्
पीनवक्षा विशालाक्षो लक्ष्मीवान् शुभलक्षणः

12. धर्मज्ञस्सत्यसंधश्च प्रजानांच हिते रतः
यशस्वी ज्ञान संपन्नः शुचिर्वश्यस्समाधिमान्

13. प्रजापति समश्रीमान् धाता रिपु निषूदनः
रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता

14. रक्षिता स्वस्य धर्मस्य स्वजनस्य च रक्षिता
वेद वेदांग तत्त्वज्ञो धनुर्वेदे च निष्ठितः

15. सर्व शास्त्रार्थ तत्त्वज्ञः स्मृतिमान् प्रतिभानवान्
सर्वलोकप्रियस्साधुः अदीनात्मा विचक्षणः

16. सर्वदाभिगतस्सद्भिः समुद्र इव सिंधुभिः
आर्यस्सर्वसमश्चैव सदैव प्रिय दर्शनः

17. स च सर्व गुणोपेतः कौसल्यानंद वर्धनः
समुद्र इव गांभीर्ये धैर्येण हिमवानिव

18. विष्णुना सदृशो वीर्ये सोमवत्प्रिय दर्शनः
कालाग्नि सदृशः क्रोधे क्षमया पृथिवी समः

19. धनदेन समस्त्यागे सत्ये धर्म इवापरः

अयोध्या कांड

तमेवं गुण संपन्नं रामं सत्य पराक्रमं

20. ज्येष्ठं श्रेष्ठ गुणैर्युक्तं प्रियं दशरथस्सुतं
प्रकृतीनां हितैर्युक्तं प्रकृति प्रिय काम्यया

21. यौवराज्येन संयोक्तुं ऐच्छत्प्रीत्या महीपतिः
तस्याभिषेक संभारान् दृष्ट्वा भार्याथ कैकयी

22. पूर्वं दत्त वरा देवी वरमेन मयाचत
विवासनंच रामस्य भरतस्याभिषेचनं

23. स सत्यवचनाच्चैव धर्म पाशेन संयतः
विवासयामास सुतं रामं दशरथः प्रियं

24. स जगाम वनं वीरः प्रतिज्ञामनुपालयन्
पितुर्वचन निर्देशात् कैकेय्याः प्रियकारणात्

25. तं व्रजंतं प्रियो भ्राता लक्ष्मणोनु जगामह
स्नेहाद्विनय संपन्नः सुमित्रानंदवर्धनः

26. भ्रातरं दयितो भ्रातुः सौभ्रात्रमनु दर्शयन्
रामस्य दयिता भार्या नित्यं प्राण समाहिता

27. जनकस्य कुले जाता देव मायेव निर्मिता
सर्व लक्षण संपन्ना नारीणामुत्तमा वधूः

28. सीताप्यनुगता रामं शशिनं रोहिणी यथा
पौरैरनुगतो दूरं पित्रा दशरथेन च

29. शृंगिबेर पुरे सूतं गंगाकूले व्यसर्जयत्
गुहमासाद्य धर्मात्मा निषादाधिपतिं प्रियं

30. गुहेन सहितो रामो लक्ष्मणेन च सीतया
ते वनेन वनं गत्वा नदीस्तीर्त्वा बहूदकाः

31. चित्रकूटमनुप्राप्य भरद्वाजस्य शासनात्
रम्यमा वसथं कृत्वा रममाणा वनेत्रयः

32. देवगंधर्व संकाशाः तत्र तेन्यवसन् सुखं
चित्रकूटं गते रामे पुत्रशोकातुरस्तथा

33. राजा दशरथस्स्वर्गं जगाम विलपन् सुतं
मृतेतु तस्मिन् भरतो वसिष्ठ प्रमुखैर्द्विजैः

34. नियुज्यमानो राज्याय नैच्छद्राज्यं महाबलः
स जगाम वनं वीरो रामपाद प्रसादकः

35. गत्वातु सुमहात्मानं रामं सत्य पराक्रमं
अयाचद्भ्रातरं रामं आर्यभाव पुरस्कृतः

36. त्वमेव राजा धर्मज्ञः इति रामं वचोब्रवीत्
रामोपि परमोदारः सुमुखस्सुमहायशाः

37. नचैच्छत्पितुरादेशात् राज्यं रामो महाबलः
पादुकेचास्य राज्याय न्यासं दत्वा पुनःपुनः

38. निवर्तयामास ततो भरतं भरताग्रजः
सकाम मनवाप्यैव रामपादा उपस्पृशन्

39. नंदिग्रामे करोद्राज्यं रामागमन कांक्षया
गतेतु भरते श्रीमान् सत्यसंथो जितेंद्रियः

40. रामस्तु पुनरालक्ष्य नगरस्य जनस्य च
तत्रागमनमेकाग्रो दंडकान् प्रविवेशह

अरण्य कांड

41. प्रविश्यतु महारण्यं रामो राजीव लोचनः
विराधं राक्षसं हत्वा शरभंगं ददर्शह

42. सुतीक्ष्णं चाप्यगस्त्यंच अगस्त्य भ्रातरं तथा
अगस्त्य वचनाच्चैव जग्राहैंद्रं शरासनं

43. खड्गं च परम प्रीतः तूणी चाक्षय सायकौ
वसतस्तस्य रामस्य वने वनचरैस्सह

44. ऋषयोभ्यागमन् सर्वे वधायासुर रक्षसां
स तेषां प्रतिशुश्राव राक्षसानां तथा वने

45. प्रतिज्ञातश्च रामेण वधस्संयति रक्षसां
ऋषीणामग्नि कल्पानां दंडकारण्य वासिनां

46. तेन तत्रैव वसता जनस्थान निवासिनी
विरूपिता शूर्पणखा राक्षसी कामरूपिणी

47. ततश्शूर्पणखा वाक्यात् उद्युक्तान् सर्व राक्षसान्
खरं त्रिशिरसं चैव दूषणं चैव राक्षसं

48. निजघान रणे रामः तेषां चैव पदानुगान्
वने तस्मिन्निवसता जनस्थान निवासिनां

49. रक्षसां निहतान्यासन् सहस्राणि चतुर्दश
ततो ज़ातिवधं श्रुत्वा रावणः क्रोधमूर्छितः

50. सहायं वरयामास मारीचं नाम राक्षसं
वार्यमाणस्सुबहुशो मारीचेन स रावणः

51. न विरोधो बलवता क्षमो रावण तेन ते
अनादृत्य तु तद्वाक्यं रावणः कालचोदितः

52. जगाम सह मारीचः तस्याश्रमपदं तदा
तेन मायाविना दूरं अपवाह्य नृपात्मजौ

53. जहार भार्यां रामस्य गृध्रं हत्वा जटायुषं
गृध्रं च निहतं दृष्ट्वा हृतां शृत्वा च मैथिलीं

54. राघवश्शोक संतप्तो विललापाकुलेंद्रियः
ततस्तेनैव शोकेन गृध्रं दग्ध्वा जटायुषं

55. मार्गमाणो वने सीतां राक्षसं सन्ददर्शह
कबंधं नाम रूपेण विकृतं घोर दर्शनं

56. तं निहत्य महाबाहुः ददाह स्वर्गतश्च सः
स चास्य कथयामास शबरीं धर्म चारिणीं

57. श्रमणीं धर्मनिपुणां अभिगच्छेति राघवं
सोभ्यगच्छन्महातेजाः शबरीं शत्रु सूदनः

58. शबर्या पूजितस्सम्यक् रामो दशरथात्मजः

किष्किंधा कांड

पंपातीरे हनुमता संगतो वानरेण ह

59. हनुमद्वचनाच्चैव सुग्रीवेण समागतः
सुग्रीवायच तत्सर्वं शंसद्रामो महाबलः

60. आदितस्तद्यथावृत्तं सीतायाश्च विशेषतः
सुग्रीवश्चापि तत्सर्वं श्रुत्वा रामस्य वानरः

61. चकार सख्यं रामेण प्रीतश्चैवाग्नि साक्षिकं
ततो वानर राजेन वैरानुकथनं प्रति

62. रामायावेदितं सर्वं प्रणयाद्दुःखितेन च
प्रतिज्ञातं च रामेण तदा वालिवधं प्रति

63. वालिनश्च बलं तत्र कथयामास वानरः
सुग्रीवश्शंकितश्चासीत् नित्यं वीर्येण राघवे

64. राघव प्रत्ययार्थं तु दुंदुभेः कायमुत्तमं
दर्शयामास सुग्रीवो महा पर्वत सन्निभं

65. उत्स्मयित्वा महाबाहुः प्रेक्ष्यचास्थि महाबलः
पादांगुष्ठेन चिक्षेप संपूर्णं दश योजनं

66. बिभेद च पुनस्सालान् सप्तैकेन महेषुणा
गिरिं रसातलं चैव जनयन् प्रत्ययं तदा

67. ततः प्रीतमनास्तेन विश्वस्तस्स महा कपिः
किष्किंधां राम सहितो जगाम च गुहां तदा

68. ततो गर्जद्धरिवरः सुग्रीवो हेमपिंगळः
तेन नादेन महता निर्जगाम हरीश्वरः

69. अनुमान्य तदा तारां सुग्रीवेण समागतः
निजघान च तत्रैनं शरेणैकेन राघवः

70. ततस्सुग्रीव वचनात् हत्वा वालिनमाहवे

सुग्रीवमेव तद्राज्ये राघवः प्रत्यपादयत्

71. स च सर्वान् समानीय वानरान् वानरर्षभः
दिशः प्रस्थापयामास दिदृक्षुर्जनकात्मजां

सुंदर कांड

72. ततो गृध्रस्य वचनात् संपातेर् हनुमान् बली
शतयोजन विस्तीर्णं पुप्लुवे लवणार्णवं

73. तत्र लंकां समासाद्य पुरीं रावण पालितां
ददर्श सीतां ध्यायंतीं अशोकवनिकां गतां

74. निवेदयित्वाभिज्ञानं प्रवृत्तिं च निवेद्य च
समाश्वास्यच वैदेहीं मर्दयामास तोरणं

75. पंच सेनाग्रगण्यान् हत्वा सप्त मंत्रिसुतानपि
शूरमक्षं च निष्पिष्य ग्रहणं समुपागमत्

76. अस्त्रेणोन्मुक्तमात्मानं ज्ञात्वापैतामहाद्वरात्
मर्षयन् राक्षसान् वीरो यंत्रिणस्तान् यदृच्छया

77. ततो दग्ध्वा पुरीं लंकां ऋते सीतांच मैथिलीं
रामाय प्रियमाख्यातुं पुनरायान्महा कपिः

78. सोभिगम्य महात्मानं कृत्वा रामं प्रदक्षिणं
न्यवेदयदमेयात्मा दृष्टा सीतेति तत्त्वतः

युद्ध कांड

79. ततस्सुग्रीव सहितो गत्वा तीरं महोदधेः
समुद्रं क्षोभयामास शरैरादित्य सन्निभैः

80. दर्शयामासचात्मानं समुद्रस्सरितां पतिः
समुद्रवचनाच्चैव नलं सेतुमकारयत्

81. तेनगत्वा पुरीं लंकां हत्वा रावणमाहवे

रामस्सीता मनुप्राप्य परां व्रीडामुपागमत्

82. तामुवाच ततो रामः परुषं जनसंसदि
अमृष्यमाणा सा सीता विवेश ज्वलनं सती

83. ततोग्नि वचनात्सीतां ज्ञात्वा विगतकल्मषां
बभौ रामस्संप्रहृष्टः पूजितस्सर्व दैवतैः

84. कर्मणा तेन महता त्रैलोक्यं स चराचरं
स देवर्षि गणं तुष्टं राघवस्य महात्मनः

85. अभिषिच्य च लंकायां राक्षसेंद्रं विभीषणं
कृतकृत्यस्तदा रामो विज्वरः प्रमुमोद ह

86. देवताभ्यो वरं प्राप्य समुत्थाप्यच वानरान्
अयोध्यां प्रस्थितो रामः पुष्पकेण सुहृद्वृतः

87. भरद्वाजाश्रमं गत्वा रामस्सत्य पराक्रमः
भरतस्यांतिकं रामो हनुमंतं व्यसर्जयत्

88.पुनराख्यायिकां जल्पन् सुग्रीवसहितश्च सः
पुष्पकं तत्समारुह्य नंदिग्रामं ययौतदा

89. नंदिग्रामे जटा हित्वा भ्रातृभिस्सहितोनघः
रामस्सीता मनुप्राप्य राज्यं पुनरवाप्तवान्

90. प्रहृष्टो मुदितो लोकः तुष्टः पुष्टस्सुधार्मिकः
निरामयोह्य रोगश्च दुर्भिक्ष भयवर्जितः

उत्तर कांड

91. न पुत्र मरणं किंचित् द्रक्ष्यंति पुरुषाः क्वचित्
नार्यश्चा विधवा नित्यं भविष्यंति पतिव्रताः

92. न चाग्निजं भयं किंचित् नाप्सु मज्जंति जंतवः
न वातजं भयं किंचित् नापि ज्वरकृतं तथा

93. न चापि क्षुद्भयं तत्र न तस्करभयं तथा
नगराणि च राष्ट्राणि धनधान्ययुतानि च

94. नित्यं प्रमुदितास्सर्वे यथा कृतयुगे तथा
अश्वमेधशतैरिष्ट्वा तथा बहु सुवर्णकैः

95. गवां कोट्ययुतं दत्त्वा ब्रह्मलोकं प्रयास्यति
असंख्येयं धनं दत्त्वा ब्राह्मणेभ्यो महायशाः

96. राजवंशान् शतगुणान् स्थापयिष्यति राघवः
चातुर्वर्ण्यं च लोकेस्मिन् स्वे स्वे धर्मे नियोक्ष्यति

97. दशवर्ष सहस्राणि दश वर्ष शतानि च
रामो राज्यमुपासित्वा ब्रह्मलोकं प्रयास्यति

98. इदं पवित्रं पापघ्नं पुण्यं वेदैश्च सम्मितं
यः पठेद्राम चरितं सर्वपापैः प्रमुच्यते

99. एतदाख्यानमायुष्यं पठन् रामायणं नरः
सपुत्र पौत्रस्सगणः प्रेत्यस्वर्गे महीयते

100. पठन् द्विजो वागृषभत्वमीयात्
स्यात् क्षत्रियो भूमिपतित्वमीयात्
वणिग्जनः पण्यफलत्वमीयात्
जनश्च शूद्रोपि महत्वमीयात्

इत्यार्षे श्रीमद्रामायणे आदिकाव्ये
संक्षेपोनाम प्रथमस्सर्गः

इति श्री शतश्लोकी रामायणं समाप्तं